# माध्यमिकशिक्षापाठ्यक्रमः

## न्यायदर्शनम्

**कक्षा : ९-१०** **विषयसङ्केतः : (कक्षा ९** Nya. 311 **कक्षा १०** Nya. 312)

**पाठ्यघण्टा : ४** **वार्षिककार्यघण्टाः १६०**

## १. परिचयः

न्यायविषयकोऽयं पाठ्यक्रमो न्यायशास्त्रमवलम्ब्य क्रमशो नवम्यां दशम्याञ्च कक्षायामध्येतुकामानां छात्राणां वैशेषिकशास्त्रे प्रतिपादितानां न्यायशास्त्रे चाभिमतानां द्रव्यादिपदार्थानां न्यायशास्त्राभिमतानां प्रत्यक्षादिप्रमाणानां बोधो भवत्विति धिया निर्मितो वर्तते । पाठ्यक्रमोऽसौ २०७६ तमे वैक्रमाब्दे प्रकल्पितराष्ट्रियपाठ्यक्रमप्रारूपस्य मार्गदर्शनानुसारेण निर्मितो वर्तते । अस्मिँश्च पाठ्यक्रमे प्रतिप्रकरणं निर्धारितविषयाणां ज्ञानं, ज्ञातविषयाणाञ्चाभिव्यक्तिसामर्थ्यञ्च छात्रेषु स्यादिति धिया बोधाभिव्यक्त्योरुल्लेखो विहितो वर्तते । अस्य च पाठ्यक्रमस्य निर्माणे कथं न्यायशास्त्रमितोऽपि व्यावहारिकं भवेद् अथ च शास्त्रे छात्राणां कथं रुचिर्वर्धिता स्यादिति च विचारितो वर्तते । अतश्च अस्माच्च पाठ्यक्रमाद् राष्ट्रियोद्देश्यं प्राप्यत इत्यपेक्षितं वर्तते । पाठ्यक्रमेणानेन च सम्बद्धविषये उच्चशिक्षाया आधारोऽपि दृढीक्रियत इत्यप्यपेक्षितमस्तीति ।

न्यायवैशेषिकशास्त्रयोः प्रयुक्ताया भाषिकशैल्यास्तत्परिष्कारप्रणाल्याश्च ज्ञानार्थं न्यायसम्बद्धानां केषाञ्चन प्रमुखाणां प्रतियोग्यनुयोग्यवच्छेदकावच्छिन्नेत्यादीनां पदानामर्थबोधनेन सह सप्रयोगं सनिदर्शनं तद्विषयकविवेचनसामर्थ्यं छात्राः प्राप्नुयुरिति धिया न्यायवैशेषिकदर्शनयोः प्रयुक्ता विशेषतो तर्कसङ्ग्रहे न्यायबोधिनीनाम्न्यां तट्टीकायाञ्च प्रयुक्ताः केचन प्रमुखाः पारिभाषिकशब्दाः पाठ्यक्रमेऽत्र यथाप्रकरणं सन्निविष्टाः सन्ति । तदन्वत्र पाठ्यक्रमे वैशेषिकदर्शनप्रतिपादितान् न्यायशास्त्रेण चाभिमतान् द्रव्यादिपदार्थान् पाठ्यवस्तुत्वेन निर्धार्य न्यायशास्त्रप्रतिपादितानि प्रत्यक्षादीनि चत्वारि प्रमाणानि च पाठ्यत्वेन समाविष्टानीति । तत्र नवमकक्षायां द्रव्यादयः सप्तपदार्थाः प्रत्यक्षादीनि चत्वारि प्रमाणानि यथायथं निर्धारितानि सन्ति । उपर्युक्तानां विषयाणां व्यवस्थापनार्थमत्र पञ्च प्रकरणानि प्रकल्पितानि । प्रथमे प्रकरणे न्यायसम्बद्धाः पारिभाषिकशब्दाः समाविष्टाश्चेद् द्वितीये द्रव्यादीनामुद्देशपूर्वकं तर्कसङ्ग्रहे निरूपिता न्यायबोधिन्याञ्च स्पष्टीकृता मनोद्रव्यान्तविषया निर्धारिताः सन्ति । तृतीये च प्रकरणे तर्कसङ्ग्रहे निरूपिता न्यायबोधिन्याञ्च व्याख्याताः प्रत्यक्षप्रमान्तगुणा निर्धारिता वर्तन्ते । तुरीये च तर्कसङ्ग्रहे प्रतिपादितानि अनुमानोपमानशब्दप्रमाणानि निर्धारितानि । पञ्चमे च प्रकरणे तर्कसङ्ग्रहे प्रतिपादिता अवशिष्टगुणतोऽभावपदार्थान्ता विषयाः प्रकल्पिताः । दशमकक्षायाञ्च निर्धारितानां विषयाणां व्यवस्थापनार्थं पञ्चैव प्रकरणानि प्रकल्पितानीति । अत्रापि प्रथमे प्रकरणे न्यायसम्बद्धाः पारिभाषिकशब्दा विशेषतो मुक्तावलीसहितायां कारिकावल्यां प्रयुक्तास्तादृशशब्दाः समाविष्टाश्चेद् द्वितीये मुक्तावलीयुतायां कारिकावल्यां प्रतिपादिता मङ्गलेश्वरवादः, पदार्थोद्देशः, साधर्म्यवैधर्म्ये चेति विषयाः उपन्यस्ता इति । तृतीये च प्रकरणे मुक्तावलीसहितायां कारिकावल्यां प्रतिपादितानि दिगन्ताानि पृथिव्यादिद्रव्याणि निर्धारितानि । तुरीये मुक्तावलीसहितायां कारिकावल्यां प्रतिपादितमात्मद्रव्यं योजितं चेत् पञ्चमे मुक्तावलीयुतायां कारिकावल्यां प्रतिपादितं प्रत्यक्षज्ञानं निर्धारितमिति ।

अत्र च पाठ्यक्रमे पाठ्यक्रमानुरूपं स्तरगतक्षमत्वं स्फुटीकृत्य कक्षागतशिक्षणोपलब्धिविषयकं विवरणञ्च निर्दिष्टं वर्तते । तदनु कक्षाभेदेन विषयक्षेत्रं क्रमश्च निर्धारिताविति । एतावता चात्र पाठ्यक्रमे पाठ्यविषयाणां विषयक्षेत्र-विषयवस्तु-बोधाभिव्यक्ति-शिक्षणघण्टानां विवरणञ्च दत्तमस्ति । ततश्च प्रयोगात्मककार्यं परियोजनाकार्यञ्च निर्दिष्टे स्तः । तदनु शिक्षणसहजीकरणप्रक्रियां निर्दिश्य मूल्याङ्कप्रक्रिया सन्निविष्टेति । अन्ते मूल्याङ्कनार्थमङ्कविभागश्चोपस्थापितो वर्तते ।

२. **विषयानुगताः क्षमताः**
**अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधो निर्दिष्टविषयेषु सामान्यतो व्युत्पन्ना भविष्यन्ति –**

१. न्यायवैशेषिकशास्त्रयोर्बहुधा प्रयुज्यमानानां निर्दिष्टपारिभाषिकपदानामवबोधपूर्वकं तेषां सोदाहरणप्रयोगे

२. वैशेषिदर्शनाभिमतसप्तपदार्थानामुद्देशे

३. वैशेषिकदर्शनप्रतिपाद्यसप्तपदार्थानां सामान्यनिर्वचने

४. न्यायदर्शनाभिमतप्रमाणानां सामान्यतो विश्लेषणे

५. वैशेषिकदर्शनाभिमतद्रव्यादीनां साधर्म्यवैधर्म्यविश्लेषणपूर्वकं द्रव्यपदार्थानां विशेषनिर्वचने च

३. **कक्षागतशिक्षणोपलब्धयः**
**नवम्यां कक्षायां निर्धारितं पाठ्यांशमधीत्य छात्राणामुपलब्धयोऽधो निर्दिष्टानुसारेण भविष्यन्ति -**

| क्र.सं. | शिक्षणोपलब्धयः | शिक्षणोपलब्धीनां विस्तरः |
|---|---|---|
| १. | न्यायवैशेषिकशास्त्रयोः प्रथितानां केषाञ्चन उद्देशलक्षणपरीक्षा-लक्षणतालक्ष्यतेत्यादीनां पारिभाषिकशब्दानामर्थ-प्रकाशनम् (विशेषतो न्यायबोधिनीयुते तर्कसङ्ग्रहे प्रयुक्तानां तादृशशब्दानामर्थकथनम्) | १.१ पाठ्यग्रन्थान्तर्गतनिर्दिष्टप्रकरणेषु प्रयुक्तानां उद्देशलक्षणपरीक्षालक्षणतालक्ष्यतेत्यादीनां पारिभाषिकपदानामर्थनिर्धारणम्<br>१.२ उद्देशलक्षणपरीक्षालक्षणतालक्ष्यतेत्यादीनां पारिभाषिकपदानां वाक्येषु प्रयोगश्च |
| २. | वैशेषिकशास्त्राभिमतपदार्थोद्देशः, द्रव्यपदार्थप्रकाशनञ्च | २.१ वैशेषिकदर्शनाभिमतपदार्थोद्देशः<br>२.२ नित्यानित्यद्रव्याणां विभजनम्<br>२.३ पृथिव्यादीनां चतुर्णां द्रव्याणां सभेदनिर्वचनम्<br>२.४ आकाशादीनां नित्यद्रव्याणां विवेचनञ्च |
| ३. | प्रत्यक्षप्रमान्तगुणाभिव्यक्तिः | ३.१ रूपादिशब्दान्तानां गुणानां व्याख्यानम्<br>३.२ बुद्धेः विभजनपूर्वकं स्मृतेरनुभवस्य च भेदकथनम्<br>३.३ अनुभवस्य भेदविवेचनम्<br>३.४ करणकारणनिरूपणम् |

| | | |
|---|---|---|
| | | ३.५ प्रत्यक्षलक्षणनिर्वचनम्<br>३.६ सन्निकर्षविश्लेषणमञ्च |
| ४. | अनुमानोपमानशब्दप्रमाण-प्रकाशनम् | ४.१ सभेदानुमान-तदङ्गनिरूपणम्<br>४.२ त्रिविधलिङ्गविश्लेषणम्<br>४.३ पक्षादीनां सामान्यविवेचनम्<br>४.४ सभेदहेत्वाभासनिर्वचनम्<br>४.५ उपमाननिर्वचनम्<br>४.६ शब्दप्रमाणनिरूपणमञ्च |
| ५. | अवशिष्टगुणतोऽभावान्तपदार्थो-पस्थापनम् | ५.१ संशयाद्ययथार्थानुभवविश्लेषणम्<br>५.२ सुखादिवेगान्तगुणनिर्वचनम्<br>५.३ कर्माद्यभावान्तपदार्थविश्लेषणञ्च |

**दशम्यां कक्षायां निर्धारितं पाठ्यांशमधीत्य छात्राणामुपलब्धयोऽधो निर्दिष्टानुसारेण भविष्यन्ति -**

| क्र.सं. | शिक्षणोपलब्धयः | शिक्षणोपलब्धीनां विस्तरः |
|---|---|---|
| १. | न्यायवैशेषिकशास्त्रयोः प्रथितानां निरूपितत्व-निरूपकत्वप्रकारता-विशेष्यतेत्यादीनां पारिभाषिकशब्दानामर्थ-प्रकाशनम् (विशेषतो न्यायसिद्धान्तमुक्तावली-युतायाः कारिकावल्याः प्रत्यक्षखण्डे प्रयुक्तानां तादृशशब्दानामर्थकथनम्) | १.१ पाठ्यग्रन्थान्तर्गतनिर्दिष्टप्रकरणेषु प्रयुक्तानां पारिभाषिकपदानामर्थनिधारणम्<br>१.२ तेषां वाक्येषु प्रयोगश्च |
| २. | मङ्गलेश्वरवादविवरणम्, वैशेषिकशास्त्राभिमत-पदार्थोद्देशः, द्रव्यादीनां साधर्म्यवैधर्म्यकथनञ्च | २.१ मङ्गलस्य औचित्यप्रदर्शनम्<br>२.२ ईश्वरसाधकानुमानकथनम्<br>२.३ तदनुमानघटकहेतौ दोषप्रदर्शनपूर्वकं तन्निराकरणम्<br>२.४ वैशेषिकाभिमतपदार्थानां विभजनपूर्वकं तद्विवेचनम् |

| | | |
|---|---|---|
| | | २.५ द्रव्यादीनां साधर्म्यवैधर्म्यप्रकथनञ्च |
| ३. | दिगन्तपृथिव्यादिद्रव्य-प्रकाशनम् | ३.१ सभेदपृथिवीनिरूपणम्<br>३.२ सभेदजलनिरूपणम्<br>३.३ सभेदतेजोनिरूपणम्<br>३.४ सभेदवायुनिर्वचनम्<br>३.५ आकाशकालदिशां निरूपणञ्च |
| ४. | आत्मद्रव्यविवेचनम् | ४.१ आत्मद्रव्यनिरूपणम्<br>४.२ आत्मत्वजातिसिद्धिः<br>४.३ शरीरेन्द्रिमनःआत्मवादिनां मतखण्डनम्<br>४.४ बौद्धवेदान्तसाङ्ख्यानां मतखण्डनञ्च |
| ५. | प्रत्यक्षज्ञानोपस्थापनम् | ५.१ बुद्धेर्भेदप्रकथनम्<br>५.२ प्रत्यक्षज्ञानस्य वैविध्यप्रदर्शनम्<br>५.३ द्रव्यप्रत्यक्षकारणविश्लेषणम्<br>५.४ सविकल्पकनिर्विकल्पकज्ञानविवेचनम्<br>५.५ लौकिकालौकिकभेदेन तदुपभेदेन च सन्निकर्षविवेचनञ्च |

## ४. विषयक्षेत्रं क्रमश्च

### नवम्याः कक्षायाः कृते

| क्र.सं. | विषयक्षेत्राणि | विषयाः | बोधः | अभिव्यक्तिः | शिक्षणघण्टाः |
|---|---|---|---|---|---|
| १. | न्यायवैशेषिक-शास्त्रयोः प्रथिताः पारिभाषिकशब्दाः | उद्देशः, लक्षणम्, परीक्षा, लक्षणता, लक्ष्यता, अव्याप्तिः, अतिव्याप्तिः, असम्भवः, पक्षः, साध्यम्, हेतुः, दृष्टान्तः, पक्षः, सपक्षः, विपक्षः, अवच्छेदकम्, अवच्छिन्नम् व्याप्यत्वम् व्यापकत्वम् प्रतियोगिता, अनुयोगिता, कार्यता, कारणता | उद्देश- लक्षण- परीक्षा- लक्षण- लक्ष्यता- अव्याप्ति- अतिव्याप्ति- असम्भव- पक्ष- साध्य- हेतु- दृष्टान्त- पक्ष- सपक्ष- विपक्ष- अवच्छेदक- अवच्छिन्न- व्याप्यत्व- व्यापकत्व-प्रतियोगिता- अनुयोगिता-कार्यता- कारणताशब्दानामर्थबोधः | उद्देश- लक्षण- परीक्षा- लक्षण- लक्ष्यता- अव्याप्ति- अतिव्याप्ति- असम्भव- पक्ष- साध्य- हेतु- दृष्टान्त- पक्ष- सपक्ष- विपक्ष- अवच्छेदक- अवच्छिन्न- व्याप्यत्व- व्यापकत्व-प्रतियोगिता-अनुयोगिता- कार्यता- कारणताशब्दानाम् उदाहरणसहितवाक्येषु प्रयोगः | १० |
| २ | वैशेषिकशास्त्राभिमत पदार्थोद्देशः, द्रव्यपदार्थश्च | द्रव्यादयः सप्तपदार्थाः, पृथिवी द्रव्यम्, पृथिव्याः भेदः, पृथिव्याः शरीरेन्द्रियविषयाः जलद्रव्यम्, जलस्य भेदः, जलस्य शरीरेन्द्रियविषयाः तेजो द्रव्यम्, तेजसो भेदः, तैजसाः शरीरेन्द्रियविषयाः वायुर्द्रव्यम्, वायोर्भेदः, वायवीयाः शरीरेन्द्रियविषयाः आकाशद्रव्यम्, कालद्रव्यम् | द्रव्यादीनां सप्तपदार्थानां नाममात्रेण बोधः, पृथिव्याः लक्षणबोधः, पृथिव्या भेदज्ञानम्, अनित्यपृथिव्याः शरीरेन्द्रियविषयभेदेन कार्यबोधः<br><br>जलद्रव्यस्य लक्षणबोधः जलद्रव्यस्य भेदज्ञानम्, अनित्यजलस्य शरीरेन्द्रियविषयभेदेन कार्यबोधः तेजसो लक्षणबोधः, तेजसो भेदज्ञानम्, अनित्यतेजसः शरीरेन्द्रियविषयभेदेन कार्यबोधः | द्रव्यादीनां सप्तपदार्थानां नाममात्रेण सङ्कीर्तनम्, पृथिव्या लक्षणकथनम् पृथिव्या भेदनिरूपणम्, अनित्यपृथिव्या भेदकथनम् जलद्रव्यस्य लक्षणनिर्वचनम् जलद्रव्यस्य भेदनिरूपणम्, अनित्यजलस्य भेदनिरूपणम् तेजसो लक्षणनिर्वचनम्, तेजसो भेदकथनम्, अनित्यतेजसः भेदनिरूपणम् वायोर्लक्षणकथनम् वायोर्भेदनिरूपणम् अनित्यवायोः भेदकथनम् | २० |

| | | | | | |
|---|---|---|---|---|---|
| | | दिग्द्रव्यम्<br>आत्मद्रव्यम्<br>आत्मनो भेदः<br>मनो द्रव्यम्<br>मनसः परमाणुरूपत्वम् | वायुद्रव्यस्य लक्षणबोधः<br>वायोर्भेदज्ञानम्<br>अनित्यवायोः<br>शरीरेन्द्रियविषयभेदेन कार्यबोधः<br>आकाशलक्षणबोधः, कालद्रव्यस्य लक्षणबोधः<br>दिग्द्रव्यस्य लक्षणबोधः<br>आत्मद्रव्यस्य लक्षणबोधः<br>आत्मनो भेदज्ञानम्<br>मनसो लक्षणज्ञानम्<br>मनसः परमाणुरूपत्वबोधः | आकाशलक्षणकथनम्, कालद्रव्यस्य लक्षणनिर्वचनम्<br>दिग्द्रव्यस्य लक्षणकथनम्<br>आत्मद्रव्यस्य लक्षणकथनम्<br>आत्मनो भेदनिरूपणम्<br>मनसो लक्षणकथनम्<br>मनसः परमाणुत्वसाधनम् | |
| ३ | प्रत्यक्षप्रमान्तगुणाः | भेदसहितं रूपम्, भेदसहितो रसः, गन्धो गन्धाश्रयश्च स्पर्शः स्पर्शाश्रयश्च सङ्ख्याः, परिमाणानि पृथक्त्वम् संयोगगुणः, विभागगुणः, परत्वापरत्वे, गुरुत्वद्रवत्वे, स्नेहशब्दौ विभागसहिता बुद्धिः, स्मृतिरनुभवश्च, यथार्थायथार्थानुभवौ करणसहितकारणानि, प्रत्यक्षप्रमाणं प्रमा च सन्निकर्षः | भेदसहितरूपज्ञानम्, भेदसहितानां रसानामवबोधः, गन्धस्य गन्धाश्रयस्य चावबोधः स्पर्शगुणस्य स्पर्शाश्रयस्य चावबोधः सङ्ख्यागुणबोधः, परिमाणगुणस्य ज्ञानम् पृथक्त्वबोधः संयोगगुणस्यावबोधः, विभागगुणस्य बोधः, परत्वापरत्वयोरवबोधः, गुरुत्वद्रवत्वयोर्ज्ञानम् स्नेहशब्दयोर्बोधः बुद्धेः तद्विभागस्य च ज्ञानम्, स्मृतेरनुभवस्य च बोधः, यथार्थानुभवस्य ज्ञानमयथार्थानुभवस्य च बोधः करणसहितकारणानामवबोधः, प्रत्यक्षप्रमाणस्य प्रत्यक्षप्रमायाश्चावबोधः | सभेदरूपप्रतिपादनम्, भेदसहितरसनिरूपणम्, गन्धस्य गन्धाश्रयस्य च कथनम्, स्पर्शस्य स्पर्शाश्रयस्य च निरूपणम्, सङ्ख्याः, परिमाणकथनम्, पृथक्त्वसाधनम्, संयोगनिरूपणम्, विभागविभजनम्, परत्वापरत्वयोर्विचारः, गुरुत्वद्रवत्वयोर्निरूपणम्, स्नेहस्य शब्दस्य चोपस्थापनम्, विभागसहिताया बुद्धेर्निर्वचनम्, स्मृतेरनुभवस्य च प्रतिपादनम्, यथार्थायथार्थानुभवयोर्वर्णनम्, करणसहितकारणलक्षणनिरूपणम्, प्रत्यक्षप्रमाणस्य प्रमायाश्च च प्रतिपादनम्, सन्निकर्षस्य सन्निकर्षभेदस्य च विचारः | २० |

| | | | | | |
|---|---|---|---|---|---|
| | | | सन्निकर्षस्य सन्निकर्षभेदस्य चावबोधः | | |
| ४. | अनुमानोपमानशब्द-प्रमाणानि | अनुमानम्,<br>अनुमितिः,<br>परामर्शः, व्याप्तिः, पक्षधर्मता,<br>स्वार्थानुमानम्,<br>पञ्चावयववाक्यानि,<br>त्रिविधलिङ्गम्,<br>पक्षः,<br>सपक्षः,<br>विपक्षः,<br>सभेदहेत्वाभासः,<br>उपमानप्रमाणम्,<br>उपमितिः,<br>शब्दप्रमाणम्,<br>शक्तिलक्षणाख्यवृत्तिः,<br>शाब्दबोधकारणानि,<br>शाब्दस्वरूपम्,<br>शब्दप्रमाणभेदः, | अनुमानस्वरूपबोधः,<br>अनुमितिस्वरूपज्ञानम्,<br>परामर्शबोधः,<br>व्याप्तिज्ञानम्,<br>पक्षधर्मतावबोधः,<br>स्वार्थानुमानबोधः,<br>पञ्चावयववाक्यबोधः,<br>त्रिविधलिङ्गज्ञानम्,<br>पक्षबोधः,<br>सपक्षबोधः,<br>विपक्षबोधः,<br>सभेदहेत्वाभासज्ञानम्,<br>उपमानप्रमाणबोधः,<br>उपमितिप्रकारबोधः,<br>शब्दप्रमाणज्ञानम्,<br>शक्तिलक्षणाख्यवृत्तिज्ञानम्,<br>शाब्दबोधकारणबोधः,<br>शाब्दस्व–रूपज्ञानम्,<br>शब्दप्रमाणभेदबोधः, | अनुमानस्वरूपाभिव्यक्तिः,<br>अनुमितिस्वरूपनिरूपणम्,<br>परामर्शस्वरूपकथनम्,<br>व्याप्तिस्वरूपविचारः,<br>पक्षधर्मताकथनम्,<br>स्वार्थानुमाननिर्वचनम्,<br>पञ्चावयववाक्यनिरूपणम्,<br>त्रिविधलिङ्गप्रतिपादनम्,<br>पक्षप्रकाशनम्,<br>सपक्षकथनम्,<br>विपक्षप्रतिपादनम्,<br>सभेदहेत्वाभासनिर्वचनम्,<br>उपमानप्रमाणकथनम्,<br>उपमितिप्रकारनिर्वचनम्,<br>शब्दप्रमाणाभिव्यक्तिः,<br>शक्तिलक्षणाख्यवृत्तिनिरूपणम्,<br>शाब्दबोधकारणनिर्धारणम्,<br>शाब्दस्व–रूपनिरूपणम्,<br>शब्दप्रमाणभेदप्रतिपादनम् | २८ |
| ५ | अवशिष्टगुणतोऽभाव पदार्थान्ताः | संशयविपर्ययतर्काः, स्मृतिः, सुखदुःखे, शेषात्मगुणाः, सभेदसंस्कारः, सामान्यलक्षणम्, विशेषः, समवायः सभेदाभावः, सर्वपदार्थानां सप्तस्वन्तर्भावः । | संशयविपर्ययतर्काणां स्वरूपबोधः,<br>स्मृतिज्ञानम्,<br>सुखदुःखयोस्वरूपज्ञानम्,<br>शेषात्मगुणबोधः,<br>सभेदसंस्कारपरिज्ञानम्,<br>सामान्यलक्षणज्ञानम्,<br>विशेषबोधः, समवायज्ञानम्,<br>सभेदाभावबोधः, सर्वपदार्थानां सप्तस्वन्तर्भावज्ञानम् । | संशयविपर्ययतर्काणां स्वरूपपरिचयः,<br>स्मृतिनिरूपणम्,<br>सुखदुःखयोस्वरूपाभिव्यक्तिः,<br>शेषात्मगुणनिरूपणम्,<br>सभेदसंस्कारनिर्वचनम्,<br>सामान्यलक्षणकरणम्,<br>विशेषनिरूपणम्,<br>समवायप्रतिपादनम्म्,<br>सभेदाभाववर्णनम्, सर्वपदार्थानां | २० |

| | | | | | |
|---|---|---|---|---|---|
| | | | | सप्तस्वन्तर्भावकथनम् । | |
| **सैद्धान्तिकाभ्यासः** | | | | | ९६ |
| **प्रयोगाभ्यासः** | | | | | ३२ |
| **योगः** | | | | | १२८ |

## दशम्याः कक्षायाः कृते

| क्र.सं. | विषयक्षेत्राणि | विषयाः | बोधः | अभिव्यक्तिः | शिक्षणघण्टाः |
|---|---|---|---|---|---|
| १. | न्यायवैशेषिक-शास्त्रयोः प्रथिताः केचन पारिभाषिकशब्दाः ( विशेषतो न्यायसिद्धान्त-मुक्तावल्याः प्रत्यक्षखण्डे प्रयुक्ताः तादृशाः शब्दाः) । | निरूपितत्वम्, निरूपकत्वम्, प्रकारता, विशेष्यता, प्रतिबध्यता, प्रतिबन्धकता, उत्तेजकः, अप्रयोजकत्वम्, विनिगमना, अयुतसिद्धत्वम्, आधेयता, अधिकरणता, साधर्म्यम्, वैधर्म्यम्, पारिमाण्डल्यम्, भूतत्वम्, मूर्त्तत्वम्, विभुत्वम्, व्याप्तवृत्तित्वम्, अव्याप्यवृत्तित्वम् | निरूपितत्व- निरूपकत्व- प्रकारता- विशेष्यता- प्रतिबध्यता- प्रतिबन्धकता- उत्तेजक- अप्रयोजकत्व- विनिगमना- अयुतसिद्धत्व- आधेयता- अधिकरणता- साधर्म्य- वैधर्म्य- पारिमाण्डल्य- भूतत्व- मूर्त्तत्व- विभुत्व- व्याप्तवृत्तित्व- अव्याप्यवृत्तित्वशब्दानामर्थबोधः | निरूपितत्व- निरूपकत्व- प्रकारता- विशेष्यता- प्रतिबध्यता- प्रतिबन्धकता- उत्तेजक- अप्रयोजकत्व- विनिगमना- अयुतसिद्धत्व- आधेयता- अधिकरणता- साधर्म्य- वैधर्म्य- पारिमाण्डल्य- भूतत्व- मूर्त्तत्व- विभुत्व- व्याप्तवृत्तित्व- अव्याप्यवृत्तित्वशब्दानामुदाहरणसहित वाक्येषु प्रयोगः | ७ |
| २ | मङ्गलेश्वरवादः, वैशेषिकशास्त्राभिमत पदार्थोद्देशः, द्रव्यादीनां साधर्म्यवैधर्म्ये च | मङ्गलवादः, ईश्वरवादः, पदार्थोद्देशः, द्रव्यादिपदार्थानां साधर्म्यवैधर्म्ये | मङ्गलवादस्य औचित्यबोधः, ईश्वरास्तित्वज्ञानम्, उद्देशमात्रेण पदार्थबोधः, द्रव्यादिपदार्थानां साधर्म्यवैधर्म्यबोधः | मङ्गलवादस्य औचित्योद्घाटनम् ईश्वरास्तित्ववर्णनम्, नाममात्रेण पदार्थकथनम् द्रव्यादिपदार्थानां साधर्म्यवैधर्म्यनिर्वचनम् | २४ |
| ३ | दिगन्तााानि पृथिव्यादिद्रव्याणि | पृथिवीलक्षणम्, पृथिवीत्वजातिसिद्धिः, पाषाणे गन्धसिद्धिः, पृथिव्या विभागः, अतिरिक्तावयवी, परमाणुः, पार्थिवशरीराणि, पार्थिवेन्द्रियम्, पार्थिवविषयाः, जललक्षणम्, | पृथिवीलक्षणबोधः, पृथिवीत्वजातिसाधनप्रक्रियाज्ञानम्, पाषाणे गन्धज्ञानम्, पृथिव्या विभागबोधः, अतिरिक्तावयविज्ञानम्, परमाणुज्ञानम्, पार्थिवशरीरबोधः, | पृथिवीलक्षणनिरूपणम्, पृथिवीत्वजातिसाधनप्रक्रियाप्रदर्शनम्, पाषाणे गन्धसाधनम्, पृथिव्या विभागकरणम्, अतिरिक्तावयविसाधनम्, परमाणुसाधनम्, | २४ |

| | | | | | |
|---|---|---|---|---|---|
| | | जलत्वजातिः, जलीयशरीरेन्द्रियविषयाः, तेजोलक्षणम्, तेजस्त्वजातिः, तैजसशरीरेन्द्रियविषयाः, सुवर्णस्य तैजसत्वम्, वायुः, वायवीया विषयाः, आकाशः, कालः, दिक् | पार्थिवेन्द्रियज्ञानम्, पार्थिवविषयबोधः, जललक्षणज्ञानम्, जलत्वजातिबोधः, जलीयशरीरेन्द्रियविषयज्ञानम्, तेजोलक्षणज्ञानम्, तेजस्त्वजातिबोधः, तैजसशरीरेन्द्रियविषयज्ञानम्, सुवर्णस्य तैजसत्वपरिज्ञानम्, वायोर्बोधः, वायवीयानां विषयाणामवबोधः, आकाशज्ञानम्, कालज्ञानम्, दिग्बोधः | पार्थिवशरीरनिर्वचनम्, पार्थिवेन्द्रियकथनम्, पार्थिवविषयनिर्देशनम्, जललक्षणप्रतिपादनम्, जलत्वजातिसाधनम्, जलीयशरीरेन्द्रियविषयनिरूपणम्, तेजसो लक्षणकथनम्, तेजस्त्वजातिसाधनम्, तैजसशरीरेन्द्रियविषयाः, सुवर्णस्य तैजसत्वसाधनम्, वायुलक्षणप्रतिपादनम्, वायवीयविषयकथनम्, आकाशनिरूपणम्, कालनिर्वचनम्, दिक्साधनम् | |
| ४ | आत्मद्रव्यम् | आत्मसाधकानुमानम्, आत्मत्वजातिः, शरीरेन्द्रियमनोभिन्नात्मा, क्षणिकविज्ञानभिन्नात्मा, नित्यविज्ञानभिन्नात्मा, साङ्ख्यमतनिरासः, परकीयशरीरवृत्त्यात्मा | आत्मसाधकानुमानस्वरूपबोधः, आत्मत्वजातिज्ञानम्, शरीरेन्द्रियमनोभिन्नात्मज्ञानम्, क्षणिकविज्ञानभिन्नात्मबोधः, नित्यविज्ञानभिन्नात्मबोधः, साङ्ख्यमतनिराकरणप्रक्रियाबोधः, परकीयशरीरवृत्त्यात्मज्ञानम् | आत्मसाधकानुमानप्रतिपादनम्, आत्मत्वजातिसाधकानुमान-प्रतिपादनम्, शरीरेन्द्रियमनोभिन्नात्मप्रतिपादनम्, क्षणिकविज्ञानभिन्नात्मकथनम्, नित्यविज्ञानभिन्नात्मसाधनम्, साङ्ख्यमतनिराकरणम्, परकीयशरीरवृत्त्यात्मनिरूपणम् | ९ |
| ५. | प्रत्यक्षज्ञानम् | अनुभूतेश्चातुविध्यम्, प्रत्यक्षप्रमालक्षणम्, प्रत्यक्षप्रमाविभागः, प्रत्यक्षप्रमाया विषयाः, द्रव्यप्रत्यक्षकारणम्, त्वङ्मनःसंयोगस्य ज्ञानसामान्यहेतुत्वम्, सविकल्पकनिर्विकल्पकज्ञाने, | अनुभूतेश्चातुर्विध्यज्ञानम्, प्रत्यक्षप्रमालक्षणबोधः, प्रत्यक्षप्रमाविभागज्ञान्, प्रत्यक्षप्रमाया विषयावबोधः, द्रव्यप्रत्यक्षकारणज्ञानम्, त्वङ्मनःसंयोगस्य ज्ञानसामान्यहेतुत्वबोधः, सविकल्पकनिर्विकल्पकज्ञानयोः | अनुभूतेश्चातुर्विध्यप्रतिपादनम्, प्रत्यक्षप्रमालक्षणनिरूपणम्, प्रत्यक्षप्रमाविभागप्रदर्शनम्, प्रत्यक्षप्रमाया विषयनिरूपणम्, द्रव्यप्रत्यक्षकारणनिर्वचनम्, त्वङ्मनःसंयोगस्य ज्ञानसामान्यहेतुत्वप्रतिपादनम्, सविकल्पकनिर्विकल्पकज्ञानयोर्निर्वचन | २४ |

| | | | | | |
|---|---|---|---|---|---|
| | | इन्द्रियलक्षणम्, लौकिकालौकिकसन्निकर्षौ च | स्वरूपबोधः, इन्द्रियलक्षणज्ञानम्, लौकिकालौकिकसन्निकर्षयोर्बोधः | म्, इन्द्रियलक्षणनिरूपणम्, लौकिकालौकिकसन्निकर्षयोर्निरूपणम् | |
| **सैद्धान्तिकाभ्यासः** | | | | | ९६ |
| **प्रयोगाभ्यासः** | | | | | ३२ |
| **योगः** | | | | | १२८ |

## ५. प्रयोगात्मककार्यं परियोजनाकार्यञ्च

इमे क्रियाकलापाः सम्भाव्याः सन्ति । एतान् क्रियाकलापान् निदर्शनस्वरूपेण मत्वा अन्येऽपि क्रियाकलापाः सञ्चालयितुं शक्यन्ते ।

| कक्षा ९ | | कक्षा १० | |
|---|---|---|---|
| **विषयाः** | **शिक्षणघण्टाः** | **विषयाः** | **शिक्षणघण्टाः** |
| न्यायवैशेषिकशास्त्रयोः प्रथिताः पारिभाषिकशब्दाः (विशेषतो तर्कसङ्ग्रहे तन्न्यायबोधिनीटीकायां प्रयुक्ताः तादृशाः शब्दाः) | ५ | न्यायवैशेषिकशास्त्रयोः प्रथिताः केचन पारिभाषिकशब्दाः (विशेषतो न्यायसिद्धान्तमुक्तावल्याः प्रत्यक्षखण्डे प्रयुक्ताः तादृशाः शब्दाः) । | ५ |
| वैशेषिकशास्त्राभिमतपदार्थोद्देशः, द्रव्यपदार्थश्च | ६ | मङ्गलेश्वरवादः, वैशेषिकशास्त्राभिमतपदार्थोद्देशः, द्रव्यादीनां साधर्म्यवैधर्म्ये च | ७ |
| प्रत्यक्षप्रमान्तगुणाः | ६ | दिगन्तानि पृथिव्यादिद्रव्याणि | ६ |
| अनुमानोपमानशब्दप्रमाणानि | ९ | आत्मद्रव्यम् | ५ |
| अवशिष्टगुणतोऽभावपदार्थान्ताः | ६ | प्रत्यक्षज्ञानम् | ९ |
| योगः | ३२ | योगः | ३२ |

## ६. शिक्षणसञ्चालनप्रक्रिया

न्यायविषयस्य अध्यापने अध्ययने तज्ज्ञाने च शिक्षणसहजीकरणप्रक्रिया अपरिहार्या भवति । अत्र खलु यद्यपि विद्यार्थिकेन्द्रितक्रियाकलापे बलं देयमथापि शिक्षककेन्द्रितक्रियाकलापा अपि न त्याज्याः । कक्षायां शिक्षकः स्वयमपि सक्रियो जागरूको वा भवेत् । ततोऽपि छात्रा उत्सुका जागरूकाश्च भवेयुः । अतो मूलतो विद्यार्थिकेन्द्रितविधिरवलम्बलनीयः । यान् विधीनवलम्ब्य शिक्षणकार्ये सम्पादिते सति छात्राणां सम्यग् बोधः सम्पद्येत, तथाविधाः ये केऽपि विधयः शिक्षकेण प्रयोक्तुं शक्यन्ते । पाठ्यक्रमप्रकरणगतान् विषयान् बोधयितुं शिक्षणसहजीकरणप्रक्रियायाः कृते अधस्तनाः शिक्षणपद्धतयोऽवलम्बनीयाः -

**(क) व्याख्यानविधिः** अत्र विधौ छात्राणां पुरतः यथाप्रकरणान्तर्गतं पाठ्यं विषयं प्रस्तुत्य सम्यग् विवरणं देयम् । व्याख्यामुखेन पाठ्यविषयः सम्यक् स्फुटीकर्तव्यः ।

**(ख) प्रश्नोत्तरविधिः** अत्र विधौ पूर्वं व्याख्याते विवृते च विषये छात्राणां कियान् बोधो जातः ? इति ज्ञानार्थं पाठितविषये छात्राः प्रष्टव्याः । अज्ञाते अस्पष्टे च पुनर्व्याख्या विधेया ।

**(ग) प्रदर्शनविधिः (प्रयोगविधिः)** न्यायवैशषिकशास्त्रयोः लक्षणबाहुल्याल्लक्ष्ये तत्समन्वयप्रकारबोधनावसरे प्रथमतो लक्षणघटकानि तत्परिष्कारघटकानि पारिभाषिकपदानि विद्यार्थिनां पुरतः श्यामपट्टादिषु विलिख्य व्याख्याय च तेषां समन्वयप्रकारं प्रदर्श्य छात्राः प्रष्टव्याः, बोधस्थितिं विचार्य पुनर्व्याख्या च विधेया ।

**(घ) अवेक्षणविधिः** लक्षणघटकानां पदानां परस्परं समन्वयः कथम् ? कथञ्चान्यत्रापि तानि पदानि प्रयोक्तव्यानीति छात्राः सावधानतया प्रत्यक्षतोऽवेक्षेरन् । अयं विधिर्विशेषतो विद्यार्थिकेन्द्रितः ।

**(ङ) अन्तःक्रियात्मकविधिः** पाठितस्य अंशस्य छात्राणां बोधः कियान् कीदृशश्च जातः ? इति ज्ञानार्थं छात्रैः सह शिक्षकस्य परस्परं छात्राणाञ्च अन्तःक्रिया कार्या । अज्ञाते स्थले च पुनर्व्याख्या विधेया ।

**(च) आगमनविधिः** प्रथमतः कस्यापि विषयस्य नियमं लक्षणं वानुक्त्वा तद्विषयकं विवरणं लक्ष्यस्थलं वोपस्थापनीयम् । तत एव व्याख्यातस्य विषयस्य नियमो लक्षणं वा वाच्यम् । विद्यार्थिनां बोधाभावे ते पुनर्बोधनीयाश्च ।

**(छ) निगमनविधिः**

अत्र विधौ आगमनविधिविपरीततया व्याख्येयस्य विषयस्य नियमं लक्षणं वा विविच्य उदाहरणं लक्ष्यस्थलं वोपस्थापनीयम् । ततः कथञ्च लक्षणस्य लक्ष्ये समन्वयो भवतीति च सम्यग् विवेच्यम् ।

उक्तान् शिक्षणविधीन् प्रयुज्य सहजाध्यापनस्य कृते शिक्षकैरधस्तनाः केचन विषया विशेषतोऽवधेयाः -

(अ) शिक्षकेण वार्षिकीं मासिकीं पाक्षिकीं साप्ताहिकीं दैनिकीञ्च शिक्षणयोजनाम् एवमेव पाठ्यांश-शिक्षण-योजनां दैनिक-पाठयोजनां च निर्माय, तदनुसारेण शिक्षणकार्यं सम्पादनीयम् ।

(आ) पाठ्यविषयेषु छात्राणां यथा रुचिः प्रवृत्तिश्च सम्पद्येत तदनुरूपं शिक्षणं सम्पादनीयम् ।

(इ) पाठ्यमानस्य पूर्वं पाठितस्य च विषयस्य सम्बन्धं बोधयित्वैव पाठ्यकार्यमारभणीयम् ।

(ई) न्यायवैशेषिकविषययोः पाठनक्रमे प्रथमतस्तस्मिन् पाठे प्रयोक्तव्यानां पारिभाषिकपदानां छात्रेभ्यः परिचयं दत्त्वा तेषां प्रयोगस्थलञ्च निर्देष्टव्यम् ।

(उ) पदार्थानां प्रमाणानाञ्चाध्यापनक्रमे न केवलं ग्रन्थगतपङ्क्तेः रटने तद्बोधे एव बलं देयमथापि तत्रस्थपङ्क्तिगतानि पारिभाषिकपदानि प्रयुज्य व्यावहारिकवाक्यनिर्माणे च छात्रा उत्प्रेरणीयाः ।

## ७. मूल्याङ्कनप्रक्रिया

शिक्षणेन सह विषयवस्तूनां मूल्याङ्कनमपि सततं विधेयम् । औपचारिकरूपेण अनौपचारिकरूपेण वा शिक्षणमुपलब्धिमूलकं वस्तुगतञ्च जातं न वेति मापनप्रक्रियाऽपि प्रवर्तनीया । तत्र मौखिकं लिखितं प्रयोगात्मकञ्च विधिमवलम्ब्य प्रकरणगतानां विषयाणां बोधः शिक्षार्थिनां जातो न वेति सततमवधेयम् । मूल्याङ्कनावसरे छात्रैः कीदृशी योग्यता व्युत्पत्तिश्चाधिगता कुत्र च समस्या ? समाधानञ्च कथं विधेयमित्यादिज्ञानार्थञ्च मूल्याङ्कनविधिरवलम्बनीयः ।

प्रारम्भिक-निर्माणात्मक-निदानात्मक-निर्णयात्मकभेदेन मूल्याङ्कनविधेः चातुर्विध्यं वर्तते । चतुर्विधोऽपि विधिरवलम्बनीयः । तत्र वार्षिकपाठयोजनानुसारेण मासिकं पाक्षिकं साप्ताहिकं दैनिकञ्च कक्षाकार्यविधिं निर्धार्य मौखिकीं लिखिताञ्च परीक्षां विधाय छात्राणां शैक्षिकी स्थितिः व्युत्पत्तिश्च समीक्षणीया । मूल्याङ्कनावसरे पाठ्यक्रमप्रकरणगतेषु विषयेषु कीदृशी व्युत्पत्तिः छात्रैरधिगतेति पूर्वोक्तविधिना छात्राणां व्युत्पत्तिगतं मापनं विधेयम् ।

मूल्याङ्कनप्रक्रियां विश्वसनीयां विधिसम्मताञ्च सम्पाद्य एकरूपतायामानेतुं स्थानीय-प्रादेशिक-राष्ट्रियस्तरेषु बाह्यसार्वजनिकपरीक्षणविधौ सर्वेषु विषयेषु आन्तरं बाह्यं च मूल्याङ्कनं विधीयते । सार्वजनिकपरीक्षणे प्रतिविषयं प्रतिशतं पञ्चविंशत्या अङ्कानां कृते आन्तरं परीक्षणं, प्रतिशतं पञ्चसप्तत्या अङ्कानां कृते बाह्यं परीक्षणञ्च विधीयते । शिक्षणप्रक्रियया सहैव विषयवस्तुसम्बद्धं मूल्याङ्कनं नैरन्तर्येण विधेयम् । तत्र शिक्षणोपलब्धिः क्रमशः औपचारिकरूपेण अनौपचारिकरूपेण च परिमापनीया । शिक्षणसहजीकरणस्य क्रमे विद्यार्थिभिरधिगतानां ज्ञानशिल्पप्रयोगोच्चदक्षतासम्बद्धपक्षाणां मूल्याङ्कनञ्च अनिवार्यतया विधेयम् ।

### (अ) आन्तरं मूल्याङ्कनम्

पाठ्यक्रमे निर्धारितमुद्देश्यानुरूपं विद्यार्थिभिः ज्ञानशिल्पादिकमधिगतं न वेति विचारणीयम् । कुत्र च समस्या कथञ्च निराकरणमिति ज्ञानाय आन्तरं निर्माणात्मकं वा मूल्याङ्कनं सततं विधेयम् । न्यायशास्त्रस्य शिक्षणक्रमे एतन्मूल्याङ्कनमधस्तनानुसारेण कर्तव्यम्–

| क्र.सं. | क्षेत्रम् | अङ्कभारः |
|---|---|---|
| १. | शिक्षणसहभागिता | ३ |
| २. | कक्षाकार्यं परियोजनाकार्यं वा | ६ |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| ४. | त्रैमासिकी परीक्षा | ६ |
| योगः | | २५ |

**बाह्यमूल्याङ्कनम्**

निर्णयात्मकं मूल्याङ्कनमेव बाह्यमूल्याङ्कनमिति । अत्र तावत् छात्रैः पाठ्यक्रमे निर्धारितमुद्देश्यानुरूपं ज्ञानं शिल्पं वेत्यधिगतं न वेति सम्परीक्ष्यते । एतच्च मूल्याङ्कनमावधिकं भवति । अत्र आवधिकत्वञ्च वार्षिकत्वमिति । अतस्तावत् शैक्षिकसत्रस्यान्ते तन्मूल्याङ्कनं विधीयते । अधोनिर्दिष्टानुसारेणैतन्मूल्याङ्कनं विधातव्यम् -

# विशिष्टीकरणतालिका

**कक्षा : १०** **पूर्णाङ्काः ७५**
**समयः घण्टात्रयम्**

| **क्र. स.** | **विषयक्षेत्रम्** | **प्रश्नस्वरूपम्** | **ज्ञानम्** | | | **बोधः** | | | **शिल्पम्** | | | **उच्चदक्षता** | | | **समाधेयाः प्रश्नसङ्ख्याः** | **अङ्क -भारः** | **स्पष्टीकरणम्** |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | **क** | **ख** | **ग** | **क** | **ख** | **ग** | **क** | **ख** | **ग** | **क** | **ख** | **ग** | | | |
| १. | न्यायवैशेषिक-शास्त्रयोः प्रथिताः केचन पारिभाषिक-शब्दाः | ज्ञान-बोध-प्रयोगात्मिका | १ | - | - | १ | - | - | - | ५ | - | - | - | - | ३ | ७ | **ज्ञानबोध**क्षेत्रतः-<br>निर्दिष्टविषयवस्तुसम्बद्धम् अतिलघुप्रश्नद्वयम् ।<br>**शिल्प**क्षेत्रतः-<br>निर्दिष्टविषयवस्तुसम्बद्धः एको लघुप्रश्नः । |
| २. | मङ्गलेश्वर-वादौ, वैशेषिक-शास्त्राभिमत-पदार्थोद्देशः, द्रव्यादीनां साधर्म्यवैधर्म्ये च | ज्ञान-बोध-प्रयोगोच्च-दक्षतात्मिका | १ | - | - | १ | - | - | - | १० | - | - | - | ८ | ५ | २० | **ज्ञानबोध**क्षेत्रतः-<br>निर्दिष्टविषयवस्तुसम्बद्धम् अतिलघुप्रश्नद्वयम्<br>**शिल्प**क्षेत्रतः-<br>निर्दिष्टविषयवस्तुसम्बद्धं लघुप्रश्नद्वयम् ।<br>**उच्चदक्षता**क्षेत्रतः-<br>निर्दिष्टविषयवस्तुसम्बद्धः एको व्याख्यात्मकः प्रश्नः । |
| ३ | दिगन्ताानि पृथिव्यादि-द्रव्याणि | ज्ञान-बोध-प्रयोगोच्चदक्षतात्मिका | १ | - | - | १ | - | - | - | १० | - | - | - | ८ | ५ | २० | **ज्ञानबोध**क्षेत्रतः-<br>निर्दिष्टविषयवस्तुसम्बद्धम् अतिलघुप्रश्नद्वयम् ।<br>**शिल्प**क्षेत्रतः-<br>निर्दिष्टविषयवस्तुसम्बद्धं लघुप्रश्नद्वयम् ।<br>**उच्चदक्षता**क्षेत्रतः-<br>निर्दिष्टविषयवस्तुसम्बद्ध एको व्याख्यात्मकः प्रश्नः । |
| ४ | आत्मद्रव्यम् | ज्ञान-बोधप्रयोगात्मिका | १ | - | - | २ | - | - | - | ५ | - | - | - | - | ४ | ८ | **ज्ञानबोध**क्षेत्रतः-<br>निर्दिष्टविषयवस्तुसम्बद्धम् अतिलघुप्रश्नत्रयम् । |

| | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | | | | | | | **शिल्प**क्षेत्रतः-<br>निर्दिष्टविषयवस्तुसम्बद्ध एको लघुप्रश्नः । |
| **५** | प्रत्यक्षज्ञानम् | ज्ञान-बोध-प्रयोगाच्चदक्षतात्मिका | १ | - | - | १ | - | - | - | १० | - | - | - | ८ | ५ | २० | **ज्ञानबोध**क्षेत्रतः-<br>निर्दिष्टविषयवस्तुसम्बद्धम् अतिलघुप्रश्नद्वयम्<br>**शिल्प**क्षेत्रतः-<br>निर्दिष्टविषयवस्तुसम्बद्धं लघुप्रश्नद्वयम् ।<br>**उच्चदक्षता**क्षेत्रतः-<br>निर्दिष्टविषयवस्तुसम्बद्धः एको व्याख्यात्मकः प्रश्नः । |
| योगः | | | ५ | - | - | ६ | - | - | - | ४० | - | - | - | २४ | २२ | ७५ | |

**द्रष्टव्यः**

'क' इत्यनेन अतिलघुप्रश्नो बोध्यः ।

'ख' इत्यनेन लघुप्रश्नो बोध्यः ।

'ग' इत्यनेन सामान्यतया विस्तृतोत्तरापेक्षी (व्याख्यात्मकः) प्रश्नो बोध्यः।

**पुनश्च** - ज्ञानबोधक्षेत्राद् विकल्परहिताः प्रश्नाः प्रष्टव्याः । शिल्पक्षेत्राद् यथेच्छप्रकरणतः प्रश्नद्वयं संयोज्य आहत्य दश प्रश्नाः प्रष्टव्याश्चेद् उच्चदक्षताक्षेत्राद् यथेच्छप्रकरणत एकं प्रश्नं संयोज्य आहत्य चत्वारः प्रश्नाः प्रष्टव्याः । आहत्य तेषु दशसु छात्रैरष्टौ प्रश्नाः समाधेयाश्चेच्चतुर्षु त्रयः प्रश्नाः समाधेयाः ।

## विषयः - न्यायः

कक्षा - १०　　　　　　　　　　　　　　　　　　　　　　पूर्णाङ्काः - ७५

प्रश्नानां वामपार्श्वे दत्ता अङ्काः पूर्णाङ्कान् द्योतयन्ति । यथासम्भवं मौलिकमुत्तरं देयम् ॥

समूहः 'क'

**अधस्तनाः सर्वेऽपि प्रश्नाः समाधेयाः**　　　　　　　　　　　　**११ x १ = ११**

१. किन्नामोत्तेजकत्वम् ?

२. पारिमाण्डल्यमित्यस्य कोऽर्थः ?

३. वैशेषिकदर्शनाभिमतानि द्रव्याणि कानि ?

४. आकाशात्मनोः साधर्म्यं किम् ?

५. गन्धसमवायिकारणतावच्छेदकं किम् ?

६. नव्यमते वायुः प्रत्यक्षो वाऽप्रत्यक्षः ?

७. क्षणिकविज्ञानात्मवादिनः के ?

८. अद्वैतवेदान्तिनां मते आत्मा ज्ञानरूपो वा ज्ञानाश्रयः ?

९. साङ्ख्यमते कर्तृत्वं धर्मः प्रकृतेर्वात्मनः ?

१०. ईश्वरप्रत्यक्षसाधारणं प्रत्यक्षप्रमाया लक्षणं किम् ?

११. अलौकिकः सन्निकर्षः कतिविधः ?

**समूहः 'ख'**

**अधो लिखितेषु प्रश्नेषु अष्टौ प्रश्नाः समाधेयाः**　　　　　　　　　　**८ x ५= ४०**

१. समवायेन कार्यं प्रति तादात्म्येन द्रव्यं कारणम् इति वाक्यस्य परिष्कारो विधेयः ।

२. ईश्वरसाधकानुमानमुपस्थाप्य तत्र सत्प्रतिपक्षदोषं प्रदर्शयन् वारयत ।

३. जातिबाधकाः के? सोदाहरणं प्रस्तुत ।

४. द्रव्यादीनां पञ्चानां साधर्म्यं यथाग्रन्थं प्रतिपादयत ।

५. अवयवपुञ्जादतिरिक्तानामवयविनां सत्त्वे प्रमाणमुपस्थापयत ।

६. जलत्वजातिसाधकानुमानं निरूपयत ।

७.	आकाशसाधकान्यनुमानानि यथाक्रमुपस्थापयत ।

८.	शरीरस्यात्मत्वे दोषं प्रदर्शयत ।

९.	चक्षुर्ग्राह्यान् विषयान् दर्शयत ।

१०.	लौकिकसन्निकर्षस्य सोदाहरणं वैविध्यं प्रस्तुत ।

**समूहः 'ग'**

**अधस्तनेषु प्रश्नेषु त्रयाणां प्रश्नानां विस्तृतमुत्तरं दत्त ।** **३ x८= २४**

१.	मङ्गले साफल्यसाधकानुमानमुपस्थाप्य मङ्गलविषयकं प्राच्यनव्यमतभेदं दर्शयत ।

२.	साधर्म्यं वैधर्म्यञ्च परिभाष्य अकारणत्वं कस्य साधर्म्यमिति यथाग्रन्थं स्फुटीकुरुत ।

३.	तेजोलक्षणं विलिख्य सुवर्णादिस्तैजसत्वे मानमुपस्थापयत ।

४.	सौत्रं प्रत्यक्षप्रमाया लक्षणं विलिख्य प्रत्यक्षप्रमाया भेदान् दर्शयत ।